# ॥ श्रीकृष्णमङ्गळाष्टकम् ॥

श्रीनारीवदनाम्बुजस्य तरणिः श्रीवत्सधारी हरिः
श्रीवैकुण्ठविलासलोलुपमतिः श्रीकौस्तुभालन्कृतः ।
श्रीमद्ब्रह्मपिनाकिपूजितपदः श्रीशङ्खचक्रान्कितः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ १ ॥

कस्तूरीयुतगन्धलेपुततनुः कुन्दाब्जमालाधरः
केयूरादिसमस्तभूषणयुतः कञ्जादिचिह्नान्कितः ।
मीनाङ्काद्भुतकोटिसुन्दरतनुर्मायातिगो माधवः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ २ ॥

देवानामधिपः पिनाकिसुसखो देवारिदर्पापहः
कौण्डिन्यादितपस्विसङ्घविनुतः कौन्तेयसंरक्षकः ।
वेद्याद्यर्थपदक्रमादिसमितो विश्वाधिनाथो हरिः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ३ ॥

पृथ्वीभारनिवारणी सुनिरतः पृथ्वीपतिः पार्थिवैः
मान्धातृप्रमुखैः समर्चितपदो मीनान्ततातो गुरुः ।
नक्षत्राधिपचण्डभानुनयनो नागेन्द्रशायी हरिः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ४ ॥

सर्वज्ञः सनकादिभिः परिवृतः सर्वेषु कृत्येष्वपि
ध्येयो धामनिवासबिम्बवसतिः सर्वज्ञचूडामणिः ।
सत्यज्ञानशुभस्वरूपसुखदः सर्वेष्टदाता हरिः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ५ ॥

गोविन्दो गरुडध्वजो गुरुतमो गाङ्गेयसंरक्षकः
गाङ्गेयाम्बरचुम्बितो गगनसद्गन्गापतिर्गोगतिः ।
गन्धर्वादिसुगीतहृष्टहृदयो गोपालबालान्वितः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ६ ॥

यज्ञेशो यदुनन्दनो यदुपतिर्यज्ञेश्वरो यज्ञभुक्
यज्ञघ्नेशतनूजभावभरितो यज्ञाऽभिधेयो हरिः ।
यज्ञोद्धासविभूतयज्ञफलदो यज्ञप्रियः श्रीकरः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ७ ॥

पूर्णप्रज्ञमतस्थितार्यसुखदः पूर्णेण्दुबिम्बस्थितः
पुण्यानेकफलप्रदानचतुरः श्रीपुण्डरीकप्रियः ।
विज्ञानाद्यमलाकृतिर्विजयते श्रीविट्ठलः श्रीकरः
श्रीव्यासार्यमनोऽम्बुजस्थिररतिः कुर्यात्सदा मङ्गलम् ॥ ८ ॥

॥ इति श्रीव्यासराजविरचितं श्रीकृष्णमङ्गळाष्टकम् ॥